यद्वये श्रीनृसिंहेत्यष्टाणमित्युरुन्नमः। ऋषिर्ब्रह्मास्य गायत्री छंदो देवो नृकेसरी २६ शक्तिर्नेत्रं वियद्वीज

१= जयजय श्रीनृसिंह ८ =१

१= इं क्रों क्रौः हं बीजं इत्यर्थः =१

१= हां ह्रीं हूं हैं हौं हः=१ ३= श्रीं ह्रीं जयलक्ष्मीप्रियाय नित्यप्रमुदितचेतसे लक्ष्मीश्रितार्द्धदेहाय श्रीं ह्रीं नमः ३१=३

स्रष्टे:२

मं० सुभेचंद्रसमन्विते। वियतादीर्घयुक्तेनैचंद्राढ्येन षडंगकं २७ श्रीमन्नृकेसरितनो जगदेकबंधो श्रीनीलकंठ
ए२ करुणार्णव सामराज। वह्नीन्दुतीव्रकरनेत्र पिनाकपाणे शीतांशुशेखर रमेश्वर पाहि विष्णो २८ एवं ध्यात्वा
जपेल्लक्षाष्टकं तत्पदशांशतः। जुहुयात्पायसेनाग्नौ पूजाद्यस्य तु पूर्ववत् २९ तारः पश्चाद् ह्रींश्च जयलक्ष्मी व
प्रियाय च। नित्यप्रमुदितांते तु चेतसे पदमीरयेत् ३० लक्ष्मीश्रितार्द्धदेहाय रमामायेनमः परं। एकाधि
कत्रिंशदर्णो मनुः पद्मभवो मुनिः ३१ छंदोतिजगती प्रोक्तं देवः श्रीनरकेसरी। बीजं रमा द्विजाशक्तिः श्रीबी
जेन षडंगकं ३२ श्रीराधावक्षमुखदेवनिकरैरग्र्यादिसंवेष्टितः शंखंचक्रगदांबुजं निजकरैर्बिभ्रत्त्रिनेत्रा
सितः। सप्तधीशफणातपत्रलसितः पीतांबरालंकृतो लक्ष्म्याश्लिष्टकलेवरो नरहरिः स्तान्नीलकंठो मुदे राम०
३३ एवं ध्यात्वा जपेल्लक्षत्रयं षष्टिसहस्रकं। मधुक्तैर्मल्लिकापुष्पैर्जुहुयाज्जगवेदसि ३४ षट्त्रिंशतासह ५२

92

३= ॐ क्ष्रौं नमो भगवते नरसिंहाय ॐ क्ष्रौं मत्स्यरूपाय ॐ क्ष्रौं कूर्मरूपाय ॐ क्ष्रौं वराहरूपाय ॐ क्ष्रौं नृसिंहरूपाय ॐ क्ष्रौं = ५
५= वामनरूपाय ॐ क्ष्रौं ॐ क्ष्रौं ॐ क्ष्रौं रामाय ॐ क्ष्रौं कृष्णाय ॐ क्ष्रौं कल्किने जय जय शालग्रामनिवासिने दि= ६
६= व्यसिंहाय स्वयंभुवे पुरुषाय नमः ॐ क्ष्रौं ६६=७

शालग्रामपीठे पूर्वोदिते यजेत्तां प्रथमावरणेऽङ्गानि परे शक्तिरिमाः पुनः ३५ भास्वती भास्करी चिंता युतिरुन्मीलि
नी तथा। रमा कांची सचिश्चेति शक्राद्या हेतिसंयुताः ३६ इत्थं सिद्धे मनौ मंत्री नियहानुग्रहक्षमः। मल्लिका
कुसुमैर्होमादिष्टसिद्धिमवाप्नुयात् ३७ प्रणवोन्त्र हरेर्बीजं नमो भगवते पदं। नरसिंहाय तारस्वबीजं म
त्स्येतिकीर्तयेत् ३८ रूपाय तारो बीजं च कूर्मरूपाय वर्णिकाः। तार बीजे वराहाणां रूपाय तारबीजके ॐ
नृसिंहरूपायेति तु तारो बीजं च वामन। रूपाय त्रिस्तार बीजे रामायेति पदं वदेत्। तारो बीजं च कृष्णाय ता
रो बीजं च कल्किने। जय द्वयं ततः शालग्राम दीर्घ सिने त्रिका ४१ वासिने दिव्यसिंहाय स्वयंभूर्ङेन्तिमस्ततः।
पुरुषाय नमस्तारो बीजं मनुरितो मनुः ४२ हरेर्नव नवत्यर्णो मुनिरत्रिः किलास्य तु। छन्दोऽतिजगती देवो नृ
केसर्यवतारवान् ४३ बीजपूर्वोदितं शक्तिराद्य बीजेन चाङ्गकं। कृत्वा षट् दीर्घयुक्तेन ध्यायेच्छ्रीरोदधिस्थितं
१= हरिर्दशावतारवान्. इतिवा पाठः=१

घ

३=ॐनमो भगवते नरसिंहाय नमः तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्मा [redacted] रयान्रंधयरंधय तमो ग्रस ग्रस स्वाहा अ
५= भयं आत्मनि भूयिष्ठाः ॐ क्ष्रौं इश=५

म० ४४ सहस्रचंद्रप्रतिमोदयालुर्लक्ष्मीमुखालोकनलोलनेत्रः । दशावतारैः परितः परीतो नृकेसरी मंगलमातनोतु
९३ ४५ जपो युतं दशांशेन हवनं पायसेन तु । पीठे पूर्वोदिते पूर्वमंगानि परिपूजयेत् ४६ दशावतारान्मत्स्यादीन्
दिक्पालानायुधान्यपि । प्रयोगाः पूर्ववत्प्रोक्ताः सर्वसिद्धि [redacted] प्रदेमनो ४७ तारं
नमो भगवते नरसिंहाय हृच्च ते । जस्तेजसे आविराव [redacted] र्भव वज्रनखांततः ४८ वज्रदंष्ट्र च कर्मांते त्वाशया
न् रंधय द्वयं । तमो ग्रस द्वयं वह्नेः कलत्रमभयं पुनः ४९ आत्मन्यंते च भूयिष्ठाः स्तारो बीजं मनुः स्मृतः । द्विपंचा
शीः शुकस्त्वस्य मुनिश्छंदस्तु पूर्ववत् ५० आभयो नारसिंहस्तु देवताऽन्यत्तु पूर्ववत् । अथ गोपालमनवः प्रो
च्यंते इष्टसाधकाः ५१ गोपीजनपदस्यांते वल्लभाय यामिसुंदरी । दशाक्षरो मनुः प्रोक्तो मनोरथफलप्रदः ५२ ना
कृ रदोऽस्य विराट् छंदो मुनिपूर्वाः समीरिताः । बीजशक्ती तु विज्ञेये क्रमात्कामानलप्रिये ५३ आचक्राय हृदाद्यानि राम० ९३

२=गोपीजनवल्लभाय स्वाहा १०=२ क्लीं बीजं स्वाहा शक्तिः=९

३ = ॐ गों ॐ नमः मूर्ध्नि। ॐ पीं ॐ नमः नेत्रयोः। ॐ जं ॐ नमः श्रोत्रयोरित्यादि = ३

विचक्राय शिरोपि चांसु चक्राय शिखा पश्चात्त्रैलोक्यरक्षणोत्ततः ५४ चक्राय कवचं प्रोक्तं मस्तु शांतकशाद्दतः। चक्री
याश्त्रमिदं कुर्यादंगानां पंचकं मनोः ५५ सर्वांगे [illegible]र्मनुं न्यस्य वर्णान्यासं समाचरेत्। मस्तके नेत्रयोः श्रुत्यो
र्नासोर्वक्त्रे हृदयं भुजे ५६ जठरे लिंगदेशे च जानुनोः पादयोरपि। वर्णान्त्यस्तान्पुरान्यस्ये हृद्द्वादशान्नमसान्वितान् ५७
हृद्वारापुगकल्पपाद[redacted]पतले स इत्न पीठ भुजे शोणामेव सु पत्रके स्थितमजं पीतांब
रालंकृतं। जीमूताभमनेकभूषणायुतं गोगोपगोपीवृतं गोविंदं स्मर सुंदरं मुनियुतं वेणुं रणंतं स्मरेत् ५८ स
वं ध्यात्वा जपे[redacted]न्न लक्षं दशांशं सरसीरुहैः। जुहुयात्पूजयेत्पीठे वैष्णवे नंदनंदनं ५९ आग्न्यादिकोणेषभ्यर्च्य
दाद्यं गचतुष्टयं। दिशासु षट्सुदले षष्टौ महिषीः परिपूजयेत् ६० रुक्मिणी सत्यभामा च नग्नजित्तनया[redacted]
र्कजा। मित्रवृंदा लक्ष्मणा च जांबुवत्या सुशीलिका ६१ महिष्योष्टौ सुवर्णाभा विचित्राभरणस्रजः। दलाग्रेव सु

कालिंदी

म० ९४ देवं च देवकीनंदं गोपतिं ६२ यशोदां बलभद्रं च सुभद्रां गोपगोपिकाः॥ इंद्रादीनपि वज्रादीन्पूजयेत्त
दनंतरं ६३ इत्थं सिद्धे मनौ मंत्री साधयेत्स्वमनीषितं॥ गुडूचीशाकलैरग्नौ जुहुयाज्ज्वरशांतये ६४ कृ
ष्णं द्वेषंप्रकुर्वंतं बलदेवस्वरूपिणः॥ घृतासक्तस्य संचिंत्य गोमयोद्भवगोलकान् ६५ जुहुयात्तद्वे
सिध्यर्थं नरयोः सुहृदोर्मिथः॥ पिचुमंदफलोत्पन्नतैलाभ्यक्तैः समिद्वरैः ६६ अष्टाजे जुहुयाद्राज्ञाव
युतं शत्रुशांतये॥ अयुतं प्रजपेन्मंत्रमात्मानं संस्मरन्हरिं ६७ मंत्रग्रस्तगतप्राणं कृष्णकेसरिपुं सुधीः॥
शत्रुजन्मर्क्षवृक्षोत्थसमिद्भिरयुतं निशि ६८ जुहुयाद्दिष्टमुग्योपि सपत्नो निधनं व्रजेत्॥ पलाशकु
मैर्लक्षं विद्यासिध्यै जुहोतु मा ६९ तंदुलैः सितपुष्पाढ्यै राज्याक्तैः प्रत्यहं नरः॥ हुत्वा सप्तदिनान्येतद्
स्मभालेच मूर्द्धनि॥ ७० धारयन्वशयेत्सद्यो यो वनिताश्च पुरुषान्वा॥ पुष्पवासो जनं वा पितावूलमथ्य च राम० ९४

नें ७१ सहस्रंमंत्रंतुनाजप्त्वाप्रदद्याद्धोमेनरायसः।वशमेत्यचिरादेवसपुत्रपशुबांधवः ७२ वृंदावनस्थंगायंतंगो
पीभिः संस्मरन्हरिं।अपामार्गस्य समिद्भिर्योजुहुयाद्दशयेज्जगत् ७३ रासक्रीडागतंकृष्णंध्यायन्यो ऽयुतमा
जपेत्।समासाद्यह्यक्षितांकन्यामुद्वहेद्दक्षितत्परः ७४ जपेत्सहस्रंध्यायंतीयाकदंबस्थितंहरिं।कन्य
कावास्थितंनाथंमंडलीतर्ल्लभेतसा। ७५ पत्रैःफलैःसमिद्भिर्वाबिल्वोद्भवैर्मधुसंयुतैः। ॥कमलैःशर्क
रायुक्तैर्होमाल्लक्ष्मीपतिर्भवेत् ७६ बहुनाकिमिहोक्तेनकृष्णःसर्वार्थदोनृणां।अथमंत्रांतरंवक्ष्ये
ऋयुतं गोविंदस्येष्टदंनृणां ७७ कामोबियद्रेचिकाढ्यंपीतावामाक्षिसंयुता।चक्रीभिंटीशमारूढोबकोनंतो
न्वितोमरुत् ७८ हृदयांतोमनुःश्रेष्ठोवसुवर्णोखिलेष्टदः।मुनिसंमोहनाद्योस्यनारदःपरिकीर्तितः।
७९ गायत्रीछंदइत्युक्तंदेवस्त्रैलोक्यमोहनः।कामबीजेनषड्दीर्घयुक्तेनांगंसमाचरेत् ८० कल्पार्केऊहस्
रोग

२= क्लीं हृषीकेशाय नमः ८= २

ष्पं १

३=पक्षिराजाय स्वाहा = ३

मं० लसंस्थितवयोराजोन्नतांसस्थितंपो बाणमथेक्षुचापकमलेपाशांकुशे बिभ्रतां चक्रंशंखगदेकरैरुदबिजा
९५ संश्लिष्टदेहं हरिं नानाभूषणरक्तलेपकुसुमे पीतांबरं संस्मरेत् ८० एवंध्यात्वा जपेत्सूर्यलक्षं त्रिमधुरप्लुते।
पलाशपुष्पैर्जुहुयात्तैःसहस्रं हुताशने ८१ तर्पयेत्सलिलैस्तावत्पीठे पूर्वोदिते यजेत्। पक्षिराजाय ८२ ह्
ह्ममनेनगरुडार्चनं ८३ मुकुटं शिरसी हस्ताथकर्णयोः कुंडलेयजेत्। करे सुचक्राद्यस्त्राणि श्रीवत्सकौ
स्तुभं हृदि ८४ वनमालांगले श्रोणिदेशे पीतांबरं श्रियं। वामांगे भ्रूयुग्मं द्वारादिविघ्निद्वंगपूजनं ८ दि
दिक्षुप्रपूज्य चतुरो वाणान्कोणेषु पंचमं। लक्ष्म्याद्याः शक्तयः पूज्याः शार्ङ्गाद्यान्यायुधान्यपि ८६ ल
क्ष्मीः सरस्वती चापि रतिः प्रीतिश्च तुर्थिका। कीर्तिः कांतिस्तुष्टिपुष्टी इति लक्ष्म्यादयो मलाः ८७ राम०
विजयापुष्पसंयुक्तैर्जलैर्यस्तर्पयेद्धुतं। प्रातःप्रत्यहमेतस्य वांछितं मासतो भवेत् ८८ अयुतं तु घृते ९५

मालतिपुष्प १

३=श्रीं ह्रीं क्लीं कृष्णाय गोविंदाय स्वाहा १२=३

नाम्नोद्धृत्वा संपाजं(ते)द्धृतं। तावज्जप्तं प्रियाकांतं भोजयेद्दशमेति सः। ८९ कामबीजेपि विज्ञेया परिचर्यो
क्तमंत्रवत्। विशेषात्कामिनीवर्गमोहको मनुनायकः। ९० रमाभवानीकंदर्पः कृष्णाय स्मृतिरो युता।
विंदाय वह्निजायांतो द्वादशार्णो मनुः स्मृतः। ९१ मुनिर्ब्रह्माथ गायत्री छंदः कृष्णोस्य देवता। धरैकं च
द्वरामाक्षिनेत्रार्णैरंगमीरितं। ९२ उपासनास्य मंत्रस्य पूर्ववत्परिकीर्तिता। अथ वक्ष्ये षोडशार्णं मनुं लोक
विमोहनं ९३ तारो हृद्भगवान्ङेंते रुक्मिणीडे तवल्लभः। द्विठांतः षोडशार्णोयं नारदोस्य मुनिस्स्मृतः ९४ छं
दोनुष्टुप्देवता तु रुक्मिणीवल्लभो हरिः। एकाद्वियुगसप्ताक्षिवर्णैः पंचांगमीरितं ९५ चिंताश्मयुक्तानि
जदोः परिष्वक्तं तमालिंगितं सज्जलजेन करेण पत्न्या। सोवर्णवेत्रयुतहस्तमनेकभूषं पीतांबरं भज कृष्ण त
मभीष्टसिध्यै। ९६ लक्षं जपेद्दशांशेन पद्मैर्हीमं समाचरेत्। अंगैर्नारद[illegible]वन्नारिभृज्ञाद्यैः पूजयेद्धरिं नारदंप

४=ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा १६=४ १=नारदाद्यैरिंद्राद्यैर्वज्राद्यैरित्यन्वयः=१

२प कृष्णेन १

५= हृदयः =५ १= क्लींगोवल्लभाय स्वाहा ८=१

मं० वेतं जिष्णुं निसठोद्भवदारुकान्तं ।। बिभ्रक्ष्मे नं च सैनेयं दिव्यं स्थविरनतासुतं ।। ८८ कामो गोवल्लभो ङें नतः स्वाहान्तो ष्टाक्षरो
९६ मनुः ।। गायत्री कृष्ण धातारः छंदो देवर्षयो मताः ।। वर्णयुग्मैः समस्तेन पंचांगविधिरीरितः ।। ८९ हरिं पंचवर्षं व्रजे धाव
मानं स्वसौन्दर्यसंमोहितस्वर्गयोषं ।। यशोदासुतं श्रीगणेर्हिष्टकेलिमञ्जेभूषितं भूषणैर्नूपुराद्यैः ।। ९० अष्टलक्षं
जपेदष्टसहस्रं ब्रह्महस्तजैः ।। समिद्भिः प्रजुहुयाद्दग्गाचीदिग्विदिर्द्धेष्य ९० वासुदेवः संकर्षणः प्रद्युम्नश्चानिरु
द्धकः ।। रुक्मिणी सत्यभामा च लक्ष्मणा जांबवत्यपि ।। ९१ संक्रंदनाद्यः पूज्या वज्राद्यान्यायुधानि च ।। एवं सिद्धे म
नौ मंत्री संपदामालयो भवेत् ।। ९२ कामसंपुटितं कृष्णपदं वेदाक्षरो मनुः ।। गायत्री नारदः कृष्णश्छंदो मुनिर्धीश्व
रः ।। ९३ दीर्घारूढेन कामेन षडंगन्यासमाचरेत् ।। कल्पद्रुमूलसंरूढपद्मस्थं चिंतयेद्धरिं ।। ९४ कल्पद्रोरभिरमणीय राम०
पल्लवेभ्यः प्रोद्भूतैर्मणिभिः करैः प्रसिक्तं चतुर्लक्षं जपेन्मंत्रं दशांशं बिल्वसंभवैः ।। फलैः प्रजुहुयाद्योयजेद्गामि ९६

३= क्लीं कृष्ण क्लीं ४=३

१४ मीशं ।। ध्यायेयेकनेकनिभां ऽस्तुकेवसानं भुंजानं दधिनवनीतपायसानि ।।४१

96

३=देवकीसुत गोविंद वासुदेव जगत्पते।। देहि मे तनयं कृष्ण त्वामहं शरणं गतः। ३२=४

पूर्ववत् १०६ महापद्मं तथा पद्मं शंखं मकरकच्छपौ। मुकुंदकुंदनीलांश्च निधीनिंद्रादिकांस्तु समर्चयेत् १०७ इंद्रादीन्वज्र
पूर्वांश्च पूजयेत्तदनंतरं। इत्थं जपादिभिः सिद्धो मंत्री निधिरिवापरः १०८ मंत्रेष्वेषु दशार्णोक्तान्प्रयोगान्विदधी
त चाथ पुत्रप्रदं वच्मि कृष्णमंत्रमनुत्तमं १०९ देवकीसुत गोविंद पदं वासुदेव पदं प्रोच्य संबु
ध्यंतं जगत्पतिं ११० देहि मे तनयं प्रोच्य कृष्ण त्वामहमीरयेत्। शरणं गत इत्यंतो मंत्रो द्वात्रिंशदक्षरः १११ नार
दो मुनिरस्योक्तो ऽनुष्टुप् छंद ईरितं। देवः सुतप्रदः कृष्णः पादैः सर्वेण चांगकं। विजयेन युतो रथस्थितः प्रस — अर्जुनेन
मानीय समुद्रमध्यतः। प्रददत्तनयान्द्विजन्मने स्मरणीयो वसुदेवनंदनः ११३ लक्षं जपो ऽस्य तु तद्दशांशं होमस्तिलैर्म
धुरसंप्लुतैः। अर्चा पूर्वोदिता चैवं मंत्रः पुत्रप्रदो नृणां ११४ नृसिंहो माधवारूढो लोहितो निगमादिमः। कृ
शानुभार्यापिंडार्णो मनुर्विघ्नहरः परः ११५ अनंत पंक्ति पंत्ती द्रा मुनिश्छंदस्त्वदेवताः। तारं वह्निप्रिये बीजश

१=ॐ क्षिप स्वाहा=१   गरुडः=१   ॐ बीजं. स्वाहा. शक्तिः=१

मं० ५७

२= गरुडप्रभंजयप्रभंजयप्रभेदयप्रभेदयवित्रासयवित्रासयविमर्दयविमर्दयस्वाहा· कवचे=३

३= गरुडज्वालिशिखेस्वाहा· शिखायो=२ १= गरुडचूडाननस्वाहा· मूर्ध्नि=१

कीमंत्रस्यकीर्तितं ११६ ज्वलज्वलमहामतिस्वाहाहृदयमीरितं।गरुडेतिपदस्यांतेचूडाननशुचिप्रिया ११७
शिरोमंत्रोगरुडेतः शिखेस्वाहाशिखामनुः। गरुडाणानुदित्वांतेप्रभंजयपुगंवदेत् ११८ प्रभेदययुगंपश्चाद्वि
त्रासयविमर्दय।प्रत्येकंद्विस्ततःस्वाहाकवचेमनुरीरितः ११९ उग्ररूपधरांतेचसर्वविषहरेतिच।भीषयद्वि
तयंप्रोच्यसर्वंदहदहेतिच १२० भस्मीकुरुकुरुस्वाहानेत्रमंत्रोयमीरितः।अप्रतिहतवर्णांतेबलाप्रतिहतेति
च १२१ शासनांतेततश्चाहुंफट्स्वाहास्त्रमनुरीरितः।पादेकटौहृदिमुखेमूर्ध्निवर्णान्प्रविन्यसेत् १२२ तप्तस्वर्ण
निभंफणीन्द्रनिकरैःक्लृप्तांगभूषंप्रभुंस्मर्तॄणांशमयंतमुग्रमखिलंन्नृणांविषंतन्वता।चंचद्व्यग्रप्रचलद्भुजं
गमभयेपाणौवरंबिभ्रतंपक्षोच्चारितसामगीतममलंश्रीपक्षिराजंभजे १२३ पंचलक्षंजपेन्मंत्रंदशांश रा० ५७
न्नुद्धयान्तिलैः।पूजयेन्मातृकापद्मेगरुडंवेदविग्रहं १२४ चतुर्थ्यंतःपक्षिराजःस्वाहापीठमनुःस्मृतः।उद्धांगके

६= उग्ररूपधरसर्वविषहरभीषयभीषयसर्वंदहदहभस्मीकुरुकुरुस्वाहा· नेत्रत्रयो=५

५= अप्रतिहतबलाप्रतिहतशासनहुंफट्स्वाहा· अस्त्रे=४ १= गरुडायस्वाहा=१

97

स्थावरं जंगमं च ८२

रिः कामधेनमाप्नोत्येतेषु पूजयेत् १२५ अनंतं वासुकिं चापि तृतीयं तक्षकं पुनः। कर्कोटकं तथा पद्मं महापद्मं समर्चयेत् १२६ शंखपालं च कुलिकं मित्राद्यैर्वज्रसंयुतान्। एवं सिद्धमनो मंत्री नाशयेद्गरलं ध्रुवं १२७ विषुभक्तिपरो नित्यं यो भजेत्पक्षिनायकं। शत्रून्सर्वान्पराभूय सुखीभोगसमन्वितः १२८ जीवेद्दनेकवर्षाणि सेवितो धरणीधवैः॥ कलेवरान्ते ग्रीनाथसायुज्यं लभते ध्रुवं १२९ इति श्रीमन्महीधरविरचिते मंत्रमहोदधौ विषुमंत्रनिरूपणं चतुर्दशस्तरंगः॥ ॥अथ वक्ष्ये रवेर्मंत्रं रोगदारिद्र्यनाशनं। प्रणवो भुवनेशानी मेधा रेचिकया ऽन्विता
ज्वमाकान्तो ध्वजियुक्सर्गी सूर्य आदित्य इंदिरा। दशवर्णो मनुर्दृष्टो भर्गोऽस्य मुनिरीरितः १ गायत्री छंदस्तुदिष्टं देवतादिवसेश्वरः। माया बीजं रमा शक्तिर्विनियोगोऽभीष्टसाधने २ सत्येति हृदयं ब्रह्मशिरो विष्णोः शिखास्मृता। रुद्र कवचं ग्निनेत्रं स्यात्सर्वेत्यस्त्रमुदाहृतं ४ तेजोज्वालामणे हुं फट् स्वाहा नाममनावोऽङ्गगाः॥ भू
२८ अंगमंत्रा यथा॥ सत्यतेजोज्वालामणे हुं फट् स्वाहा। हृदि। ब्रह्मतेजोज्वालामणे हुं फट् स्वाहा। शिरः। विष्णुतेजो... स्वमंत्रेऽपि=१
३=ॐ ह्रीं घृ णिः सूर्यः आदित्यः श्रीं १०=३

१=ह्रीं ॐ श्रीं हृदि। ह्रीं ग्लौं श्रीं मूर्ध्नि। ह्रीं शिं श्रीं। शिरवायामित्यादि षडंगं कृत्वा। [redacted] दिं पृष्ठ ष्ठाय नमः पृष्ठे। त्यें ठं ठाय नमः जठरे न्य १ सेदित्यर्थः
२= ओं आदित्याय नमः मूर्ध्नि। रं रवये नमः वक्त्रे। उं भानवे नमः हृदि। इं भास्कराय न मः लिंगे। ॐ सूर्याय नमः पादयोः =२

मं०

यः षडंगं षड्दीर्घैः कृत्वांतस्थैः। शिवाग्नियोः ५ शेषाणां जिठरे पृष्ठे ङें नमो न्यातयोर्न्यसेत्। आदित्यं च रविं भानुं
९८
भास्करं सूर्यमेव च ६ मूर्द्धि वक्त्रे हृदि शिवे पादयोश्च प्रविन्यसेत्। मेघादि पंचहृस्वा द्यास्त चतुर्थी नमसा
त्विताः ७ मायारमागतानष्टौ वर्णान्मूर्द्धि मुखे गले। हृत्कुक्षि नाभि लिंगेषु पादयोः प्रणवादिकान् ८
अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ड्रीं तां सु मंडला य। एवमथेपि
स्वरान्सविंदूनुच्चार्य ङें तशीतांशुमंडले। शिखादि कंठपर्यंतं विन्यसेत्संस्मरन्विधुं ९ स्पर्शान्सं हूंस ककारादि भ कारान्तान्यथ विन्यासेवर्णान्
मुच्चार्य ङें तं भास्करमंडलं। कंठादि नाभि पर्यंतं न्यसेद्ध्याय न्प्रभाकरं १० यादीन्सं हूं न्च तुर्थ्यंतं बह्निमंड
लमुच्चरन्। नाभ्यादि पादपर्यंतं विन्य[redacted]सेत्पावकं स्मरन्॥ ॥मंडलत्रय विन्यासः॥ प्रोक्तस्तेजो विधायकः।
११ अकारादि ठकारांत वर्णाद्यं सोममंडलं। ङें नमोंतं न्यसेन्मंत्री मूर्द्धादि हृदयावधि १२ डकारादि क्ष राम०
कारांत वर्णाद्यं बह्निमंडलं। हृदादि पादपर्यंतं विन्यसेत्तं ङें नमोन्वितं १३ अग्निषोमात्मको न्यासः कथितः। ९८
२= अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं सोममंडलाय नमः।

98

अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं

सर्वसिद्धिदा॥ १३ सर्वं हृन्मातृकावर्णान्न्यसेत्पुरुषात्मने। नमोन्तं व्यापकं न्यस्येद्धंसन्यासोयमीरितः १४ आष्टा
वष्टौ स्वरान्पंच पंचशः शेषवर्णकाः। तन्त्रादित्यमुखान्न्यसेद्वर्तुर्थ्यन्तानुग्रहान्नव १५ आधारलिंगना[illegible]भी
हृ[illegible]त्कंठे भ्रुमुखमध्यतः॥ [illegible]मध्ये भा[illegible]लदेशे च ब्रह्म[illegible]रंध्रे क्रमान्न्यसेत् १६ वदेत्खेचरनामोते पदं भग
वते नमः हंसाख्यमग्नीषोमाख्यं मंडलत्रयसंज्ञकं। पुनर्न्यसेत्त्रयं ऊर्ध्वं मूलेन व्यापकं चरेत् १७ शोणांभो
रुहसंस्थितं त्रिनयनं वेदत्रयीविग्रहं दानाभोजयुगाभयानि दधतं हस्तैः प्रवालप्रभं केयूरांगदहारकंक
णधरं कर्णोल्लसत्कुंडलं लोकोत्पत्तिविनाशपालनकरं सूर्यं गुणाब्धिं भजे १८ एवं ध्यायन् जपेल्लक्षं दशकंत
हुताशनः। पद्मैस्तिलैर्वा जुहुयात्तर्पयेद्भोजयेद्द्विजान् १९ प्रयजेत्पीठपूजायां धर्मादिष्टस्थले विमानुपु
भूतं विवलं सारं समाराध्य विदिद्ध्वथ २० परमादीन्मुखं मध्येनंतादीन्पूर्ववद्यजेत्। सोमाग्निमंडले प्राध्येर

हंसः उत्कामिनेनमः॥ अनैनव्यापकं कुर्यात्॥ १

३= ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नमः =३   ४= ॐ ह्रं खं खखोल्काय नमः ॥ =४

२= ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ दीप्तायै नमः। ह्रीं सूक्ष्मायै नमः इत्यादि प्रयोगः =२

मं० विमंडलमर्चयेत् २१ ततोष्टदिक्षु मध्ये च पीठशक्तीरिमा नव। दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा। अमो
५९ घा विद्युता सर्वतोमुखी पीठशक्तयः २२ ह्रस्वत्रयक्लीबहीनस्वराबद्धीडुसंयुताः। बीजानि पीठशक्तीनां तं
दाद्यास्ताः प्रपूजयेत् २३ ब्रह्मविष्णुशिवात्मांते कायसौराययोगस्थितिः। पीठात्मने नमस्तार पूर्वः पीठमनुस्मृ
तः २४ तारः से डुर्वियत्कोनो बिंदुमद्बिंदुवर्जितौ। षोल्काय हृदयं मंत्रो नवार्णो मूर्तिकल्पने २५ अनेन मूर्ति
क्लृप्तायां यजेत्तद्योमनं प्रभुं। प्राग्वत्षडंगं संपूज्य दिक्ष्वष्टांगं प्रपूजयेत् २६ आदित्यं मध्यतोऽभ्यर्च्य रविं भा
नुं च भास्करं। सूर्यं दिशासु संघोदि पंचकं स्वादिकान्यजेत् २७ उषा प्रज्ञा प्रभां संध्यां मायां घर्णाद्यां विदिक्ष्वपि।
ब्राह्म्याद्या दिग्दलेष्वर्चेन्महालक्ष्मीस्त्वलेषुणौ २८ सोमं बुधं गुरुं शुक्रं दिक्ष्वाघर्णादिकान्यजेत्। अंगारकं
शनिं राहुं केतुं कोणेषु पूर्ववत् २९ इंद्राद्यान्नायुधैर्युक्तान्पार्षदान्वर्जयेद्रवेः। इत्थं सिद्धे मनो दद्यान्नवे राम० ५९

३= सघादि॰ ॐकारादि। ओ॰ ए॰ ऊ॰ इ॰ अ॰ ५ =३   ३= उषायै॰ प्रज्ञायै॰ इत्यादि =३

99

२=स्लेकादि७प्रकारोक्तो=२

२=मंडलेइत्यन्वयः=२

हृँचनहिने ३० प्राणानायम्य सहेशे कृत्वा न्यासान्पुरोदितान् तान्स्वमंडले यजेद्र्कमानसैरुपचारकैः ३१ सुतामत्र
टितेश्रस्ख तोयथा हिमनोहरं । मंडलेस्थापयेत्पात्रं रक्तचंदननिर्मिते ३२ विलोमामात्रकां मूलं जपन्संपूरयेज्जले
।। रविमंडलनिर्गछत्सुधाबुद्धिविभाविते ३३ त्रयोदशेवबस्तू निष्ठ्क्षिपेन्मूलतुमूर्वारन्नाति लतंडुलदर्भाग्रश
लिश्रपामार्गकराजिका । हयारिकुसुमं रक्तचंदनं रक्तचंदनं । गोरोचनां कुंकुमं च जपां बेरपबालिति ३५ ता
ज्जलेपीठमभ्यर्च्य वाद्यभानुं स्वमंडलात् । आखिलेरूपचारैस्तं पूजयेद्दात्हर्तीरपि ३६ प्राणायामत्रयं कृत्वा
षडंगन्यासमाचरेत् । चंदनेन सुधाबीजं द्वेकरतले लिखेत् ३७ आछादयेद् द्वृँ पात्रं बामाकोतेन [illegible]
तेन च । अष्टोत्तरशताहत्या मूलेनो[illegible]भोभिमंत्रयेत् ३८ पुनःपंचोपचारैस्तं पूजयेन्मूलमंत्रतः ।। पाणिभ्यां
पात्रमादाय जानुनीभूतलेन्यसेत् ३९ आमूर्द्धः पात्रमुद्धत्प दृष्टिं चाधाय मंडले । मनसा पूजयेत्तत्रभानु

५=प्रथमो विंदुयुतो द्वितीयो विसर्गयुतेः=५ ४=ॐ ह्रां हंसः खंखवः ६=४



१००

मं० मावरणान्वितं ४० अर्घं दद्याद्विधायत्र्कं च दत्तमंडलेऽनघ। पुष्पांजलिं दद्यान्मंडलस्थायमानवे ४१ अ
१०० ष्टोत्तरशतं मूलं जपेदासनसंस्थितः। प्रत्यकं प्राणरेखयोर्दद्यादर्घं विवस्वते ४२ लक्ष्मी यशः सुगान्विद्या मे श्व
र्यं सोऽधिगच्छति। गायत्र्युपासनासक्तः संध्यावंदनतत्परः॥ ॥४३ दशवर्णा जपन्विप्रो नैव ङः खमवाप्नुया
त॥ ॥अथ वच्मि धरासूनुमंत्रं सुतधनप्रदं ४४ तारो वियद्दीर्घबिंदुयुक्तं च द्राक्षितं पुनः। भृगुर्बिसर्गी हकारस्व
चंडीशो क्रमाद्धात्री [illegible]मार्गणो ४५ षडुर्णो मनुराख्यातो ऽभीष्टदायी क्षणात्पहः। मुनिर्विरूपो गायत्रं छं
दो देवो धरात्मजः ४६ षड्डिर्वर्णैः षडंगानि मनोः कुर्वीत साधकः ४७ जपारुणं शिवस्वेदजं हस्तपद्मेर्गदा
शूलशक्तीर्वरं धारयंतं। अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे ४८ एषलक्षं जपो होमः स राम०
मिद्भिः खदिरस्य च। शैवे पीठे यजेद्देवमंगानि प्रपूजयेत् ४९ एकविंशति कोष्ठेषु मंगलादींश्च पूजयेत्। १००

१=मंगलोदीनं. सर्वकामफलप्रदो तानेकाविंशति संख्याकान्

गद्धाहिःकऊभेनायाग्रऊलिशादीक्त मोर्चयेत ५० इन्ढंसुमिद्धंमन्त्रे शंस्वेष्टमिथ्येप्रयोजयेत्तांनारीपुत्रम
भीप्सतीभौमाहेतद्रुमेचरेत ५१ स्वेच्छयातुर्तास्विस्मान्मसाकाबाधिविन्दुप्रविन्यमेदंत्पस्तर्बकामफ
३४ प्रक्षं। लंमार्गशीर्षे ऽथवैशाखेतस्यारंभः प्रशस्यते। अरुणोदयवेलायामुस्थाय शुचिविग्रहः ५२ दंतधावेद २
पामार्गसमिधामौनसेविनी। नद्यादिसलिलेस्नात्वाधारयेद्रक्तवाससी ५३ नैवेद्यकुसुमालेपान्रक्तान्संपा
द्यसंयता। विधिज्ञंविप्रमाहूयभौममर्चेत्तदाज्ञया ५४ रक्तगोगोमयालिप्तदेशेपीठनिधेविशी। मंगला
स्वांगेषु दीनिनामानिस्वप्रतीकेषुविन्यसेत ५५ मंगलंविन्यसेदंघ्रौभूमिपुत्रंतुजानुनोः। ऊर्वौ स्वरूपणहर्त्तारंक
टिदेशेधनप्रदं ५६ स्थिरासनंगुह्यदेशेमहाकायमथोरसि। वामबाहौतुतौन्यसेत्सर्वकर्मावरोधकं
५७ लोहितंदक्षिणेबाहौलोहितांगंललेन्यसेत। वदनेविन्यसेत्साधीसामगानांकृपाकरं ५८ धरात्मजंन

६= ब्राह्मी माहेश्वरी रौद्री कौमारी वैष्णवी तथा। वाराही वैनायकी द्राक्षी चामुंडा रम्यया सहेति नव मातृकाः =६

मे० सोऽरक्तो ऽजनं भौम ललाटस्थः।। भ्रूतिं दद्यु बुभ्रुवोर्मध्ये मस्तके भूमिनंदनं। ५८ अंगारकं शिखादेशे सर्वांगं वि
१०९ न्यसेद्ध्रुवं। मेतंतो वाङ्क हृदयेन्यसेत्सर्वरोगापहारकं ५९ मूर्द्धादि हृष्टिकं तीरं पादपर्यंतविग्रहे। विन्यसेद्
दृष्टिहंतारं मूर्द्धांतं चरणादितः ६० दिवस्तु प्रविन्यसेदंतं सर्वकामफलप्रदं। आरं वक्रं भूमिजं चेना भौवन्ना
सि मूर्द्धनि ६१ एवं न्यस्तशरीरात्सो ध्यायेद्धरणिनंदनं। अर्घ्यं संस्थाप्य विधिवत्पूजयेदुपचारकैः ६२ ए
कविंशतिकोष्ठाढ्ये त्रिकोणे ताम्रपत्रगे। आवाह्य धरणीपुत्रं शोणैः पुष्पैश्च चंदनैः ६३ अंगानि पूजयेत्तस्य
स्व देकविंशति कोष्ठगा। मंगलादीं त्रिकोणेषु वक्रमारं भूमिजं ६४ आम्यायामान्नकावाद्येशकादींना
युधान्यपि। धूपदीपौ विधाय याथगो धूमान्ननिवेदयेत् ६५ जलपूर्णे ताम्रपात्रे रक्तपुष्पाक्षतान्विते फले राम०
निधाय मंत्राभ्यां भौमायार्घं [illegible] निवेदयेत् ६६ भूमिपुत्र महातेज स्वेदोद्भव पिनाकिनः।। सुतार्थिनी प्रपन्ना त्वां १०१

या१ व३

२=एकविंशतिसंख्याकाः=२

ग्रहाणार्घ्यं नमोस्तु ते ६७ रक्तप्रवालसंकाशजपाकुसुमसंनिभ। महीसुत महाबाहो ग्रहाणार्घ्यं नमोस्तु ते ६८
एकविंशति कृत्वोथ प्रणमेत्पूर्वनामभिः। प्रदक्षिणाविधानं वा स्वात्स्यो वसुधात्मजे ६९ खदिरांगारकेणाथ
कुर्याद्रेखात्रयं समं। वामपादेन मंत्राभ्यामेताभ्यां तत्प्रमार्जयेत ७० दुःखदौर्भाग्यनाशाय पुत्रसंतानहेतवे
कृतं रेखात्रयं वामपादेनैतत्प्रमार्ज्म्यहं ७१ ऋणदुःखविनाशाय मनोभीष्टार्थसिद्धये मार्जयाम्यसिता रेखा
स्तिस्रो जन्मत्रयोद्भवाः ७२ ततः पुष्पांजलिं कुर्वीत धरणीसुतं। ध्यायंती चरणांभोजे पूजासांगत्वसिद्धये
७३ धरणीगर्भसंभूतं विद्युत्तेजःसमप्रभं। कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहं ७४ ऋणहर्त्रे नमस्तुभ्यं दुः
खदारिद्र्यनाशिने। नमस्ति द्योतमानाय सर्वकल्याणकारिणे ७५ देवदानवगंधर्वयक्षराक्षसपन्नगाः। सु
खं यांति यतस्तस्मै नमो धरणिसूनवे ७६ योवक्रगतिमापन्नो नृणां दुःखं प्रयच्छति। पूजितः सुखसौभाग्यं

६= अंगारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात् =६

मं० तस्मै क्ष्मासूनवे नमः ७७ प्रसादं कुरु मे नाथ मंगलप्रद मंगल मेषवाहन रुद्रात्मन् पुत्रान् देहि धनं यशः ७८
१०२ एवं संस्तूय संपूज्य गृह्णीयाद् ब्राह्मणाशिषः। गुरवे दक्षिणां दत्वा भुंजीतान्नं निवेदितं ७९ प्रतिभौमदिनं त्वं
102 यीदेवं मंत्रसंरावधि। तिलैर्विधाप येद्धोमं शतार्द्धं भोजयेद्द्विजान् ८० माहेयमूर्त्तिं सौवर्णीमाचार्याय
निवेदयेत्। तां मंडलस्थघटेभ्यर्च्य सुतसौभाग्यसिद्धये ८१ एवं व्रतपरा नारी प्राप्नुयात् सुभगा सुतान्। धन
प्रेक्षणनाशाय व्रतं कुर्यात् पुमानपि ८२ अग्निर्मूर्द्धेत्यपि मनुं वेदिकं ब्राह्मणा जपेत्। तथांगारकगायत्रीं
सर्वाभीष्टप्रसिद्धये ८३ अंगारकाय शब्दान्ते विद्महे पदमुच्चरेत्। शक्तिहस्ताय च पदं धीमहीति ततो वदे
त् ८४ तन्नो भौमः प्रचोदयात् इति चकीर्तयेत्। एषांगारकगायत्री जप्ताभीष्टप्रदा [illegible] (यिनी) ८५ माहे
योपासने प्रोक्तं गुरुमंत्रं उदीर्यते। खड्गी शोभारमूर्तिस्तोत्राद्यो क्रूरः सयुजः ८६ नमो भद्रयुर्लोहितस्त्वौह रा०मं० १०२

अनुस्वारयुक्तः=९ १=सकारः वकारा... स्य. इतिस्क्ष

२= स्वां स्वीं स्वूं स्वैं स्वौं स्वः = २

१= ह्रूं बृहस्पतये नमः ८ = १

४= जां ऽं गै० दिक्पालैश्चैत्यर्च्यः = ४

रिर्बायुर्भृगान्वितः। हृदयांतोऽन्त्यबर्णोयंमनुर्ब्रह्मामुनिःस्मृतः ८७ छंदोऽनुष्टुप्सुराचार्योदेवताबीजमादिमं
।वह्निभ्यां दीर्घयुक्ताभ्यां षडंगानि प्रकल्पयेत् ८८ रत्नाढ्यापदवज्राराशिममलेंदु ज्ञात्किरंतंकरादाभीनं विप्
रौघोकरेनिदधंतं त्वादिराशौपरं। पीतालेपनवस्त्रपुष्पमखिलालंकारसंभूषितं विद्यासागरपारगं सुरगुरुंबंदे
सुवर्णद्युतिं ८९ जपित्वाशीतिसाहस्रं ऊत्वानेन घृतेन वा। धर्माधर्मादिपीठे तं पूजयेदंगदिग्ध्वबैः ९० सि
द्धमनोप्रऽर्वीनप्रयोगानिष्टसिद्धये। हारिद्राक्तसुमेर्हुत्वाहूतानंकेर्हिबसत्रयं ९१ साबंशतिशतंमंत्रीबा
संसिलभतेमगीरं। शत्रुरोगादिपीडासुकलहेस्वजनोद्भवे ९२ जुहुमातिप्पलोत्थाभिःसमिद्भिस्तान्निहंतये॥
तोरोबस्त्रंभगीसूयोदेहिश्रुक्रायठद्वयं ९३ एकादशाक्षरोमंत्रोहेमवस्त्रप्रदायकः। ब्रह्मामुनिर्विराट्छंदोदे
वतादैत्यपूजितः। बीजंतारोर्ध्दमिभार्याशक्तिरस्यप्रकीर्तिता। एकद्विचंद्रनेत्राग्निनेत्रवर्णैर्मनूद्भवैः ९४ विधा

एकारयुक्तोमकारः मे० इति सिद्धं

२= ॐ वस्त्रं मे देहि शुक्राय स्वाहा ११ = २

मं०
१३
103

यास्यषडंगं ध्यायेद्धि द्यानिषिंसिनां। श्वेतां भोजनिषण्णमापणान्तरे श्वेतांवरालेपनं नित्यं भक्तजनाय संप्रददतं
वासोम णीन्हेमकं। वामे नैव करेणादक्षिणा करे व्याख्यानमुद्रांकितं शुक्लं देत्यवरार्चितं स्मितमुखं वेदेस्मितं
गप्रभं ९६ अयुतं प्रजपेन्मंत्रं दशांशं जुहुयात्। हुतं पञ्चेद्भुमोदिपीठे नमे गे द्राद्दितदायुधैः ९७ सुगंधैः श्वे
तकुसुमैर्जुहुयाद्बुक्रवासरे। एकविंशतिवारं यो लभते सोऽधुकं मणीद्र ९८ बालः पवनदीर्घेंदुयुक्तोऽग्निं
शयुग्जलं। अत्रिर्व्यासाय हृदयं मनुरष्टाक्षरो मनः ९९ ब्रह्मानुष्टुप्प्रमुनिश्छंदो देवः सत्यवती सुतः। पां
[redacted]
बीजं नमः शक्तिर्दीर्घी होमादिनां गकं १०० व्याख्यामुद्रिकया लसत्
करतलं सद्योगपट्टस्थितं वामे जानुतले द्धानमपरं हस्तं सुविद्यानिधिं। विप्रव्रातवृतं प्रसन्नमनसं पाथोरु रा मं०
१३

व्यां बीजं नमः शक्तिः

४= ॐ ऽहंसः व्यां वेदव्यासाय नमः ॐ ऽहंसः =४

रा१

हां गच्छति पाँ रार्यमती व पुण्यचरितं व्यासं स्मरेत्सिद्धये ११ जपेदष्टसहस्राणि पायसे होममाचरेत्। पूर्वोक्तपी
ठे व्यासस्य पूर्वमंगानि पूजयेत् १२ प्राच्यादिषु यजेत्पैलं वैशंपायन जैमनी। सुमंतं कोणभागेषु श्रीशुकं
रोमहर्षणं १३ उग्रश्रवसमन्यांश्च मुनीन्द्रादिकायुधान्। एवं सिद्धमनुर्मंत्री कवित्वे शोभनाः प्रजाः। व्या
ख्यानेशक्तिकीर्ति च लभते संपदोक्षये १४ मृत्युंजयेन मुष्टितं यो व्यासस्य मनुं जयेत्। सर्वोपद्रवसंत्यक्तो लभ
ते वांछितं फलं १५ तारः मूलीवामकर्णो बिंदुयुक्तः सविसर्गकः। मृत्युंजयस्य मंत्रोयं त्रिवर्णो मृत्युनाशनः। १६ ॐ ऽहंसः
जप्तो यं केवलो नृणामिष्टसिद्धिं प्रयच्छति। किं पुनस्तेन पुटितो वेदव्यासाष्टरुत्तमः" १७ इति श्रीमन्महोधरार
चिते मंत्रमहोदधौ सूर्यादिमंत्रनिरूपणं। यं प्राप्य भावविशंभोर्म्मतां दैत्यानजीवयत् १ तारः खव्यापिनीं
क्रौं ड्युक्तो रश्च हराननाः। आद्यार्घीशविंदुसंयुक्तो हंसः सर्गाचिभूर्भुवः २ सकारो बालसर्गी ... बिंदिको मनुः। भू ओंकारः को

४ अस्य मंत्रस्य कहोधक ऋषिः गायत्री छंदः मृत्युं देव जं बीजं सः शक्तिः
दीर्घायुरिसकारे लिम्बग

१=ॐ हौं जूं सः भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वः भुवः भूः ॐ सः जूं हौं ॐ ५०॥१

१ ओंकारवान् = १

स्वः हौं

मं० भुवःस्वस्तु जं गेशास्तारीजं सर्गधाम स्मृतः। ३ आकाशोमस्तु विंद्वाढ्यः प्रणवांतो मतुन्नमः। महाम्रत्युंजयाख्योयं प
१४ चाशद्वर्णनिर्मितः। ४ वामदेवकहोलाख्यवसिष्ठामुनयोऽस्य तु। छंदांस्युक्तानि रुद्रेणापंक्तिगायत्र्यनुष्टुभः॥
५ सदाशिवमहाम्रत्युंजयरुद्रोस्य देवता। मायाशक्ती रमाबीजं विनियोगोर्थसिद्धये ६ मूर्द्धिवक्त्रे हृदि
मृ शिवेपदो मुनिमुखान्न्यसेत्। त्रिचैतवसुतंद्रैणुणावर्णानतुष्टुभः ७ तारो नमो भगवते रुद्राये तिपदानि
तानु। मूलादि नव वर्णाद्यानुस्का कुयाक्षिडंगके ८ मूलांते पाशाये स्वाहा हृन्मंत्रांतेन योजयेत्। अ
स्तंते मुक्षये मांजीवये ति शिरोततः। ९ शिखांते चंद्रशिरसे जटिने वह्निवल्लभा। त्रिपुरांतकाय
हां ह्रीं कवचोंते मनुःस्मृतः। १० प्रवदेत्रिपदस्यांते लोचनाय पदं पुनः। ऋग्यजुःसाममंत्राय वर्णान्नेत्रम रा म०
य नोपदेत् ११ अग्नित्रयाय ज्वल च ज्वल मां रक्षेव। अघोरास्त्राय मंत्रोयमस्त्रमंत्रो मतः। १२ द्वात्रिंशतक्षरं बका १४

स्वः × १ हृदयाय नमः १ स्मृतः

५=ॐ नमो भगवते रुद्राय ॐ हौं जूं सः भूर्भुवः स्वः त्र्यम्बकं मूलपाशाय स्वाहा। हृदये। ॐ नमो भगवते रुद्राय =
४=ॐ हौं जूं सः भूर्भुवः स्वः यजामहे अमृतमूर्त्तये मां जीवय। शिरसि। एवमग्रे षडङ्गमंत्रान्न्येयाः = ३

१ शिरसे

१=ॐ ह्रौं रं ह्रं सः भूर्भुवः स्वः त्र्यं नमः पूर्वमुखे। ॐ ह्रौं रं ह्रं सः भूर्भुवः स्वः वं नमः पश्चिममुखे। एवमग्रेपि द्रष्टव्यं=१

वर्णांस्त्रिमोमान् बिंदुसंयुतान्॥ ॥तारादिनव वर्णाद्यानंगेष्वेषु प्रविन्यसेत् १३ पूर्वपश्चिमयाम्योदङ्मुखे
षूरसि कण्ठतनपाबदनेनाभिहृत्पृष्ठके कुक्षौ लिंगगुदेन्यसेत् १४ ऊरुमूलोरुमध्ये च जानुनोर्जानुवृत्तयोः। स्तन
योः पार्श्वयोरंघ्र्योः करयोर्नसिमूर्द्धनि १५ अथैकादश विन्यसेत्पदानि शिरसि भ्रुवोः। नेत्रे वदने गंडे हृ यो
दये जठरे शिवे १६ ऊर्वोर्जानुप्रदेशे च पादयोः क्रमशः पुनः। त्रिवेदगुणांस्त्रिद्विरामाग्निगुणैर्बुधैः १७ वारणांऽ
त्रिभिर्वर्णैश्च विज्ञेया पदसंख्याक्रमाद्बुधैः। मूले न व्यापकं कृत्वा ततो ध्यायेत्त्रिलोचनं १८ हस्ताम्भोजयुगस्थ
२ कुंभयुगलादुद्धृत्यतोयं शिरः सिंचंतं करयोर्युगेन दधतं स्वांके सकुंभौ करौ। अक्षस्रग्मृगहस्तमंबुजगतं मूर्द्धस्थ
चन्द्रस्रवत्पीयूषार्द्रतनुं भजे सगिरिजं मृत्युंजयं त्र्यंबकं १९ मुष्टि सारंग शक्त्याख्या लिंगपंचमुखाभिधाः।
मुद्राः प्रदर्शयेत् प्रजपेल्लक्षं तस्य दशांशतः २० दशद्रव्यैः प्रजुहुयात्तानि बिल्वाब्जतिलाः। पायससर्पिषा दुग्ध फ

३= ॐनमोभगवतेसकलगुणात्मशक्तियुक्तायअनंताययोगपीठात्मनेनमः = ३

२=कलेविकरणी।बलेविकरणी=२

मं० दधिदूर्वाचसप्तमी २१ वटात्पलाशात्खदिरात्मामिक्षोमधुराह्नुमा॥ वामादिशक्तिसंयुक्तेशेवपीठंयजेच्छिवं
२५ २२ वामाज्येष्ठातथारौद्रीकुलीप्रोक्ताचतुर्थिका।कलादिकाविकरणीवलादिविकरणापरा २३ बलप्रमथ
नीत्वन्यासर्वभूतदमनपरा।मनोन्मनीतिशर्वस्यनवोक्ताःपीठशायः २४ तारोनमोभगवतेसकलेतिपदंत
तः।गुणात्म[redacted]शक्तियुक्तायअनंतायवदेत्पदं २५ योगपीठात्मनेपीठमंत्रःप्रोक्तोनमोन्तिकः।पीठपुष्पांज
105 लिंदत्वामूर्तिंमूलेनकल्पयेत् २६ पाद्यादिकुसुमांतोपचारै[redacted]नेत्वावतीर्यजेत्।ईशानंशंभुकोणेतुय
जेदीशानमंत्रतः २७ तत्पुरुषमघोरंचवामदेवंतृतीयकं।सद्योजातं[redacted]यजेद्दिक्षुवेदोक्तस्वस्वमंत्रतः २८
ईशानादिसमीपेषुनिवृत्याद्याकलाःक्रमात्।निवृ[redacted]त्तिः प्रतिष्ठाचविद्याशांतिस्तथैवच २९
शांत्यतीतापंचमीतिततोंगानियजेत्पषट्।सूर्येंदुक्षितितोयाग्निपवनाकाशयज्वनां ३० मूर्तयोष्टौक्रमा रामं० २५

मूर्ज्यस्तृतीयावरणस्थितः॥ ॥ताराभारकाप्रभाज्योत्स्नापूर्णोषापूरणी स्वधा॥ चतुर्थावरणे पूज्याः शक्तयो
धवलप्रभाः ३१ विश्वा वंद्या सिता प्रह्वा सारा संध्या शिवा निशा॥ पंचमावरणे ■ ऽर्च्याः शक्तयः श्यामवि
मंत्रि:॥ ग्रहाः ३२ आर्याप्रज्ञाप्रभामेधाशांतिःकांतिर्धृतिः॥ षष्ठावरणगा अष्टौ संपूज्याः ...प्रभाः ३४ अनंतः सूक्ष्मसं आरु
ज्ञश्च तृतीयस्तु शिवोत्तमः। एकनेत्रैकरुद्रौ च त्रिमूर्तिः षष्ठ ईरितः ३५ श्रीकंठोऽथ शिखंडी च सप्त पूज्यास्त्वष्ट
मावृतौ। उग्ररादियजेत्पश्चाद्गुमांबडेश्वरं पुनः ३६ नंदिनं च महाकालं गणेशं वृषभं पुनः। यजेद्भृंगिरिटिं स्कंदं
नवमावरणस्थितान् ३७ ब्राह्म्याद्या मातरः पूज्या दशमावरणे ततः॥ इंद्रादयश्च वज्राद्या एवं सिद्धो भवे
न्मनुः ३८ जन्मभेदश्च मे तस्मात्तु नक्षत्रे को न विशंके ऽ गुडयाद्याः सुधावल्ह्याः समिधश्च तदंगजलाः ३९ सं
रोगा सकलान्शत्रून्पराभूय श्रियायुतः। मोदते पुत्रपौत्राद्यः शतवर्षाणि साधकः ४० समिद्भिः श्री

म० फलो[redacted]मि[redacted]र्होमः संपत्तयेमतः।पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये ४० वटोत्थाभिर्द्दनधान्यैरवादि
१०६ रीभिस्तु कांतये।तिलैरक्षमिनाशायसर्षपैःशत्रुनष्टये ४१ पायसेन कृतोहोमः कांतिश्रीकीर्त्तिदायकः।कृ
१०६ त्वाम्रत्युञ्जयकरौदं भ्रासंबादसिद्धिदः ४२ होमसंख्यातुसर्वत्राप्ययुतमानेनकीर्त्तिता।त्र्यष्टोत्तरशतेह्
वीत्रिकहोमाद्दुजोत्तम।स्वजन्मदिवसेयस्तुपायसेमधुरान्वितैः।जुहोतितस्यवर्द्धन्तेकमलारोग्यकीर्त्तयः ४५
गडूचीवकुलोत्थाभिःसमिद्भिर्हवनेनतु।जन्मनागत्रयेरोगान्मृत्युंचापिविनाशयेत् ४६ आपामार्गसमि
द्भिश्चसिद्धार्थैरपिरुक्क्षयः।दुग्धाक्तेरमृताखंडैर्मासिंहोमोऽपिलाभये ४७ प्रत्यहंजुयाद्दूर्वाश्चपमृत्यु
विनष्टये।किंवकृतेनसर्वंप्रयच्छतिशिवोत्तमः ४८ नारीहंहड़गवाग्रडेतोरुद्रोपीतिदशास्तिर।बौधा
यनोमुनिःपंक्तिछंदोरुद्रोस्यदेवता ४९ पंचन्यासान्नपुकुर्वीतसमारुद्रत्वसिद्धये।यजुर्वेदोक्तिमार्म रामं० ॐनः १०६
१०६

२=ॐनमोभगवतेरुद्राय१०=२

आनेकत्रिंशत्स्थलेन्यसेत ५० यातेरुद्रशिखादेशेऽर्थस्मिन्महतिमस्तके। सहस्राणिललाटेतु हंसःशुचिषद्बोन्य
सेत ५१ त्र्यंबकंनेत्रयोः श्रुत्योर्नमः श्रुत्यायविन्यसेत। मानस्तोकेनासिकायांमवतन्त्यमुखेषुनः ५२ नीलग्रीवाइ
तिश्च चोर्ध्वयंकण्ठेन्यसेद्बुधः। नमस्तआयुधायेतिमंत्रमेसहृयेन्यसेत ५३ यातेहेतिरिमीवाढ्वोयैतीर्थानीतिहस्त
योः। सद्योजातंप्रपद्या[illegible]चमंगुष्ठयोर्न्यसेत ५४ वामदेवायतर्जन्योरघोरेभ्योथमध्यमयोः। तत्पुरुषायाना
मायामीशानस्तुकनिष्ठयोः ५५ नमोवःकिरिकेभ्यस्तु हृदिमंत्रमिमंन्यसेत। नमोगणेभ्यःपृष्ठेतुविन्यसेत्साध
कोत्तमः ५६ ततःपार्श्वद्वयोर्न्यस्येन्नमोहिरण्यबाहवे। हिरण्यगर्भोनाभौतुकेद्यामीढुष्टमेतिच ५७ येभूता
नामिमंगुह्येमंत्रंविन्यस्यसाधकः। अपानेशिरसायुक्तोजातवेदसइत्यपिच ५८ मानोमहान्तमित्यूर्वोर्घते
जानुनोर्न्यसेत। येपथांपादयोर्न्यस्यांध्यबोचत्कवचेन्यसेत। मंत्रंनमोबिल्मिनेचेत्युपबर्मणिविन्यसेत। नमोस्तुनील

३ = सद्योजातमित्याद्याः पंच

मं० श्रीवायव्यां तीये ऽक्षिणि शाखाकैः। ६० प्रमुंच धन्वन इति मंत्रेणास्त्रं न्यसेत्ततः। इत्येकात्रिंशदंगानां न्यासः प्रथम ई-
१०७ रितः। ६१ ततः कुर्वीत दिग्बंधं यथा तावत् इत्यृचा। मूलवर्णांस्ततो न्यस्येन्मस्तके नासिकाालिके ६२ मुखे कंठे हृदि
पुनर्हस्तयोर्दक्षवामयोः। नाभौ पदोरिति न्यासो दशांगेषु द्वितीयकः। ६३ पायोरुहस्तवेमूर्ध्नि सद्योजातं मुखा
न्यचः। विन्यसेत्प्रत्यंचं भूया द्वसंहेमेति वाणिकाः। ६४ ततीयोन्यासइत्युक्तः कृते यस्मिन्छिवो भवेत्। एवं न्यास
त्रयं कृत्वा संपुटं रचयेत्ततः। ६५ दिक्कागसवमुखा नां न्यासः संपुटसंज्ञ्यते। त्रातारमिंद्रं मंत्रेण प्राच्यां न्यसे
द्विडौजसं। ६६ त्वं नो अग्ने त्वमग्ने वाबाह्नि सुगनइत्यृचा विद्धुं। तमीशानमिति ईशानं माग्नेय्यादिषु विन्यसेत्। आस्ये
इद्रा विधिं चोर्ध्वं स्योनेति पृथिवीमधः। एवं यः संपुटं कुर्यात्तस्य प्राप्तिर्विघ्नवर्जितः ६९ तदीयामानतीदं राम०
तेव्रेन चौराघ्रपद्रवाः। न पराभवितुं शक्ताः पलायंतेऽतिदूरतः। ७० मनोजूतिर्न्यसेत्कुक्षौ वोध्यग्निर्जठरानले। १०७

३ × यमं॥ ग्रेल्वं तेम्ह वा यातुं. तल्वा यामी नितो यपं॥ ६८॥ ग्रानो नियुद्भिर्वायुर्व. वयेसोमेत्य वा × ३

स्त० १

वा

मूर्द्धिन हृदये न्यस्येन्मुखे मर्माणि ते क्रमं ७१ जातवेदाः शिरसि न्यासः प्रोक्तो चतुर्थकः ॥ हृदयं शिवसंकल्पः शि
रः पुरुषसूक्तकं ७२ शिखाद्यः संभ्रम इति वर्मा प्रतिरथमन्तं । विभ्राडिति स्मृतं नेत्रं मस्त्रं तु शाम्भरुद्रयं ७३ आ
यतु यत्र मोन्यासः कृतः सर्वेषु सिद्धिदः ॥ एवं न्यस्य प्राणायामा ध्यायेदात्मनि शंकरं । कैलाशाचलसंभिन्नं त्रिनय
नं पंचास्यमंवायुतेनीलमीवं महीशंभूषणाभरं व्याघ्रलाप्रावृतं । अक्षस्रग्वरकुण्डिकाभयकरं चान्द्रीकलाविभ्र
तं गंगांभोविलसज्जटं दशभुजं वंदे महेशं परं ७५ दशलक्षं जपेन्मंत्रमयुतं परमात्मकैः । मघृतैर्जुहुयादग्नौ पी
ठे पूर्वोदिते यजेत् ७६ पूजायंत्रमथोवक्ष्ये तथावरणदेवताः । अष्टपत्रं षोडशारं चतुर्विंशति पत्रकं ७७ दश
पत्रं ततः कुर्याद्द्वारि शार्दूलं ततः । मद्वाहिर्भूपुरं कुर्यात्तत्र रुद्रं प्रपूजयेत् ७८ इष्ट्वा तं कर्णिकामध्ये सद्योजाता
दिकान्यजेत् । दिक्षु मध्ये ततोऽष्टारे न्द्याद्दीनष्ट सेवकान् ७९ नंदी महाकालसंगणेशो वृषभस्तथा । ततो मृ

द्वौ० १

३=वलविकरणानामा३ ३=द्वितीयावरणोद्दिष्टोषः=३ कलविकरणानामा=२

मं० गिरिटिस्कंदमुमाचंडीश्वरोऽष्टमः ८० नमस्कः षोडशदले द्वितीयावरणे स्थिताः । अनंतसूक्ष्मौ च शिव एक
१८ पादेकरुद्रकः । नमस्त्रिमूर्त्तिः श्रीकंठो वामदेवोऽष्टमो मतः । ज्येष्ठः श्रेष्ठो रुद्रकालो कलाद्विकरणाभिधः ८२
वलो वलाद्विकरणो वलप्रमथनस्तथा । एतान्संपूज्य तार्तीयि तत्त्वसंख्यान्सुरान्यजेत ८३ सिद्धयोऽष्टौ मा
मै नसोऽष्टौ रेवाष्टकमितः प्रभू । ततस्तु दिरणो भवानागानं पाग्गिरीन ८४ भवः शर्वस्तथेशानः पशुपो
108 द्र एव च । उग्रो भीमो महादेवो भवाष्टकमुदाहृते ८५ अनंतो वासुकिश्चाथ तक्षकश्च कुलीरकः । कर्कोटकः
शंखपालः कंबलाश्वतरावपि ८६ इमे नागा वैन्यष्टु हे हयोऽर्जुनसंज्ञकः । शाकुनलेयो भरतो रामो न नलो
विभो पाष्टकं ८७ हिमवान्निषधो माल्यवान्यारियात्रकः मलयो हेमकूटश्च गंधमादन इत्यपि ८८ गिर्यष् राम०
कं [illegible] च मेत्तु चत्वारिंशत्सुरान्यजेत । वासवादयस्ते पांशाक्यो यायुधान्यपि ८९ वाहनानि गजाश्चेति १८

५× लीन्द्र॥ पुनरभ्यर्चयेद्वीमान्ब्रह्ममावदसांस्मृतं॥ ६५॥ आग्ने य्यां महतः इस्याऽथ विरूपाक्षं प्रभू ॐ येन्द्रा॥ विश्वरूः× ५
५× पंयातु धान्यां वायव्यां वपद्मो: पति॥ ६६॥ ॐ वर्ष× ५

त्वा शास्तुरास्मृता॥ इंद्रोग्नियमयातून्निवरुणानिलमाधिपाः ८० ईशान इति दिक्पालाः शची स्वाहा वराम
जा॥ खड्गिनी वारुणी चापि वायवी च कुवेरजा ८१ ईशानी शक्तयः प्रोक्ताः कुलिशं शक्तिदंडकौ॥ खड्गः पा
शोंऽकुशश्चैव गदा शूलं च हेतयः ८२ ऐरावतोजमहिषो प्रेतमीनमृगखराः॥ वृषभो वाहनानि स्युर्दिग्दा
नानां क्रमादमी ८३ ऐरावतः पुंडरीको वामनः कुमुदोंऽजनः॥ पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः ८४
पंचा, आग्नेय माप्पूज्यं भूग हे दिक्षु दिक्पालिंगमथैशान्यामथो भूसदनाद्वहिः॥ दिक्नागाष्टकं पूज्य मेसमाह्वानि
र्यजि॥ शेषास्यस्तक्षको नंतो वासुकिः शंखपालकः॥ महापद्मः कंबलश्च कर्कोटिकाड्मेऽहयः ८५ श्वेतो नीलः
कुंकुमाभः पीतो कृष्णो वथोज्वलः॥ वर्णतः शेषमुख्यास्तु स्तेषां जातीः फणाः शृणु वे ८६ विप्रो वैश्यस्तथा विप्र
क्षत्रियो वैश्य शूद्रको॥ [redacted] शूद्रश्च क्रम [redacted] नो ध्येयाः शेषाद्याः पूजने बुधैः ८७ दिग्वाणादशसप्तादि

१=कृतानी तिदिग्गादश्चबट्ठस्वयमन्वेति तेनयथा । त्रो·१०००। त·५००। प्र·१०००। वा·६००। द्वां·६००। म·५००। कं·द्व०। के·द्व०।=१

मं० शरसंख्यानि तु क्रमात् । शतानि त्रिंशत्त्रिंशच्च फलान्येषां समीरिताः ॥ ११ एवमभ्यर्च्य महादेवं पंचांगन्यासपूर्वकं । द
१०९ शाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने ॥ १२ मनोहराणि गेहानि सुंदर्यो वामलोचनाः । धनमिच्छापूरणं तं लभ
मे शिवसेवनात् ॥ १३ प्रयोगान्पूर्वमंत्रोक्तान् कुर्वीतात्र दशाक्षरे । दशाक्षरं भजेद्विप्रो रुद्रजापी भवेत्सदा ॥ १४ ज
अथ मन्त्रं कुबेरस्य वक्ष्ये सर्वसमृद्धिदं । यक्षाय पदमुच्चार्य कुबेराय पदं वदेत् ॥ ५ श्रवणाय धनधान्याधि
पतये धनधान्य शब्दात्समृद्धिं मे देहि दापय ठद्वयं ॥ ६ बाणरामाक्षरो मंत्रो विश्रवा मुनिरीरितः । छंदस्तु बृहती
देवः शिवमित्रं धनेश्वरः ॥ ७ त्रिचतुःपंचवसवष्टमुनिवर्णैर्मनूद्भवैः । कृत्वा षडंगं ध्यानं दर्चिमयेदलकागतं ॥ ८ म
नुजवाह्यविमानवरस्थितं गरुडरत्ननिभं निधिनायकं । शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुंदि
लं ॥ लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः । धर्मादिपीठे प्रयजेद्दलोकपहेतिभिः ॥ ९ शिवालये जपेन्मंत्रमयुत रामं० १०९

५=यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा ३५=४

२= ॐ श्रीं ॐ ह्रीं श्रीं क्लीं ब्लौं श्रीं ब्लौं वित्तेश्वराय नमः १६ = २

धनहस्तये विल्वमूलोपविष्टेन जप्तो लक्षं धनर्द्धिदः ॥ १११ ॥ आदौ तारपुटा लक्ष्मीस्ततो मायापुटा रमा । ततः
कामपुटा सैव ङें तो वित्तेश्वराय नमः ॥ ११२ ॥ षोडशाक्षरमंत्रोयं सर्वदारिद्र्यनाशनः । त्रिनेत्रमयमं...युग्मारो ह्री
ग रैकमनोः ॥ ११३ ॥ ध्यानार्चनादिकं सर्वमस्य पूर्ववदाचरेत् । अथ शंभोः शिरस्थायाः देव्याः सिंधोर्मनूच्यते ॥ ११४ ॥
प्रणवो हृदयं ङें तेशिवा नारायणीपदे । नद्रदृशहरागंगे वह्निजायानलवान्वितः ॥ ११५ ॥ मनुर्व्यासो मुनिश्छंदः
कृतिर्गंगास्य देवता । त्रिवह्नि वेदबाणाग्निनेत्रबाणैः षडंगकं ॥ ११६ ॥ उत्फुल्लामलपुंडरीकरुचिरा कृष्णेशाव
ध्यात्मिका कुंभेष्टाभयतो यजानि दधती शुभ्रांबरालंकृता । हृष्टा स्पाशशिशेखराखिलनदीशोणादिभिः
सेविताध्येया पापविनाशनी मकरगा भागीरथी साधकैः ॥ ११७ ॥ लक्षं जपेद्दशांशेन जुहुयात्स घृतैस्तिलैः ।
जयादिशक्तिभिर्युक्ते पीठे भागीरथीं जयेत् ॥ ११८ ॥ यजेन्नकेसरे ध्वंगं दले रुद्रं हरिं विधिं सूर्यं हिमाचलं मेनाम्

५= ॐ नमः शिवायै नारायण्यै दशहरायै गंगायै स्वाहा २० = ५

४=ॐ नमो भगवति ऐं हिलि हिलि मिलि मिलि गंगे मां पावय पावय स्वाहा २७=५

मे० गीरथमणं पतिं ११९ दलाग्रमो मीनकूर्ममं डूकमकरानपि हंसानकारंडवांश्चक्रवाकान्सारसकान्यजेत् १२०
११० चतुरश्रेशक्रमुख्यान्नायुधैः संयुतान्यजेत् । एवं संसाधितो मंत्रो भीष्टं यच्छति मंत्रिणां १२१ जेष्ठशुक्ल दश-
म्यां तां विशेषेणाभजेद्बुधः । दद्याद्दशभ्यो विप्रेभ्यो दशप्रस्थमितांस्तिलान् १२२ जप्त्वा सहस्रं जुहुयाच्चो
क ष्यतन्त्रबिल्वमंषः । सर्वभोगसमायुक्तो जायते मानवो भुवि १२३ तारो नमो भगवति वाक्समहज्ज्ञगंतं लिपि
कियातं ह्रीपिनाकीश विषला: सूक्ष्मसंयुता: १२४ गंगे मां पावय इदं मंत्रेद्भूतवह्नांगना । गिरिनेत्राद्य
रीविद्यास्ततापातकसंघहृत् १२५ रामवेदांकबद्धगानेत्रा गिरिगमीरितां इष्यमादिमसप्ता एत्यकोका
नखरांहसे १२६ बाणवेदाग्निरामाग्नियुग्मारोः स्यात्षडंगकं तारो हिलिं द्वं द्वंगंगे देविनमो मनुः १२७ मिलि
मिथि वर्णाः गमस्याग्निनेत्रा द्व्यग्नियुगाढ्निभिः । तारो मायारमा हार्दं नमो भगवती मिचं १२८ गोमस्तत्त्वत्रीम रामं०
२=ऐं हिलि हिलि मिलि मिलि गंगे मां पावय पावय स्वाहा २०=२ ११०
१=ॐ हिलि हिलि मिलि मिलि गंगे देवि नमः १५=१ १=ॐ ह्रीं श्रीं नमो भगवति गंगदयितेनमो हुं फट् १८=१

२= ॐ ऐं ह्रीं श्रीं क्लीं मं मणिकर्णिके ॐ नमः ॐ १५=२

हृग्वायुसेन नमो वर्म फट् मनुः त्रिनेत्रवेदपंचाग्नियुग्मैरंगमीरितं १२९ एषां चतुर्णां मन्त्राणां मुपास्तिं पूर्ववन्म
ता वाग्मायाकमलाकामवेदाद्याविषमिंदुयुक् १३० मणिकर्णिमिमी ब्रह्माहृदयं प्रकाव संपुटः ॥ मंत्रः पंचदश
र्णोस्य मुनिर्व्यासोऽतिशक्करी १३१ छंदः श्रीमणिकर्णी तु देवता सुखपुत्रदा । चंद्रनेत्राग्निनेत्रे पुर्वाक्
वर्णैः षडंगकं १३२ फुल्लेन्दीवरनिर्मितोकरतले मालामसव्ये परे बीजापुरफलं सितं बुजमयं माला दधा
नां हृदि । श्वेतक्षौमहुताशन द्विधवर्णा निबद्धां जलिध्यांतिव्या मणिकर्णिका रविसमा तोयेशका ष्ठामु
खी १३३ लक्षत्रयं जपेन्मंत्रं जुहुयात्तद्दशांशतः । पुंडरीकैस्त्रिमध्वक्तैर्यजेत्तां गंगया समं १३४ अयं मनुर्ज
नैर्जप्तो मोक्षलक्ष्मी प्रयच्छति । सुखं समस्तं संतानं सौभाग्यं धनसंचयं १३५ प्रणवो बिंदुयुग्मांतो मणिं
ते कर्णिके प्रणवात्मि हृदयं मंत्रो मनुवर्णोस्य पूर्ववत् ३६ विधेयो पासना सर्वा मणिकर्णोपासकः ॥

१= ॐ मं मणिकर्णिके प्रणवात्मिके नमः १४=१

डं
नि मा
१= के=१

५= ॐ फ्रों ब्रीं क्लीं भ्रूं आं ह्रीं क्रों श्रीं हुं फट् कार्त्तवीर्यार्जुनाय नमः २०=५ ६= क्लीं श्रीं शिरसे स्वाहा =६

६= शेषः आकारः तद्युक्तेन। यथा। फ्रां ब्रां हृदयाय नमः =६

मं० कुदेशेऽपि मन्तोयाति ब्रह्मैवाम लमवं यं१ १३७ इति श्रीमंत्रमहोदधौ षोडशादिमंत्रनिरूपणं नाम षोडशस्तरंगः॥

१११ ।अथेष्टदात्मनूत्वक्ष्ये कार्त्तवीर्यस्य गोपितान् ।यः सुदर्शनचक्रस्याऽवतारः क्षितिमंडले १ वह्नितारयु

फ तारौद्रीलक्ष्मीरग्नीन्दुशांतियुक् ।वेधाधरेन्दुशांत्याढ्यो निद्राऽग्नीशाग्निबिंदुयुक् २ पाशोमायांकुशं प

द्मावर्मास्त्रे कार्त्तवीपदं। रेफो वाय्वासनोऽनंतो वह्निजो कर्णसंस्थितो ३ मेषः सदीर्घः पवनो मनुरुक्तो

हृदंतिकः। ऊनविंशतिवर्णोयं तारादिर्नवरूपकः ४ दत्तात्रेयो मुनिश्चास्य छंदोऽनुष्टुबुदाहृतं। कार्त्त

वीर्यार्जुनो देवो बीजं शक्तिर्ध्रुवश्च हृत् ५ शेषाढ्यबीजयुग्मेन हृदयं विन्यसेद्बुधः।शांतियुक्तचतुर्थे

ॐ ह्रूं शिखायै नकामाद्येन शिरो गतं ६ इंद्वाढ्यवामकर्णाढ्यमायया वशिखा मता।शिखामंकुशपद्माभ्यां सवायुभ्यां राम०

वौषट् वर्म विन्यसेत् ७ वर्मास्त्राभ्यामस्त्रमुक्तं शेषार्णैर्व्यापकं पुनः।हृदये जठरे नाभौ जठरे गुह्यदेशतः॥८ १११

३= ॐ बीजं नमः शक्तिरिति न्यवेयः=३ १= कार्त्तवीर्यार्जुनाय नमः=१ २= क्रैं श्रैं कवचाय हुं=२

१= हुं फट् अस्त्राय फट्=१

१= ॐ फ्रों ॐ हृदये। ॐ ड्रीं ॐ जठरे। ॐ क्लीं ॐ नाभौ। एवमग्रेपि। =१   १= ॐ कों मस्तके। ॐ त्रैं ललाटे। इत्यादि

कृ [illegible]

द्वी १

क्षपादे वाम पादे स्त्रैं जानुनि जंघयोः। बिन्दुमेवं जं दशकं प्रणावक्र [illegible] द्व यमंध्यगं ९ ताराद्यान्न्वशेषाणां न्यस्त
केचललाटके भ्रुवोः। कृत्वा स्तथैवाक्षाणां नसिवक्रे गले स्तनयोः १० सर्वमंत्रेण सर्वांगे कृत्वा व्यापकमाह
तः। सर्वेष्टसिद्धये ध्यायेत्कार्त्तवीर्यं धरेश्वरं ११ उद्यत्सूर्यसहस्रकांतिरखिलक्षोणीधवैर्वंदितो हस्तानां
तपंचकेन मुदधत्वा पानि ष्षुं ष्षावता। कंठे हारकमालया परिहतश्चक्राबतारो हरेः पायात्स्यंदनगोरुणा
भवमनः श्रीकार्त्तवीर्यो नृपः १२ लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः। मतं डुलैः पायसेनवि ष्णुपीठे य
त्यमर्दविभंजनं दुष्टनाशं दुःखनाशं दुरितामयनाशकं १५ द्विष्टघ्नं शत्रुयं पूज्याः प्राच्यादिषु मिनषभाः।
क्षेमंकरी वश्यकरी श्रीकरी च यशस्करी १६ आयुःकरी तथा प्रज्ञाकरी विद्याकरी पुनः। धनकर्यष्टमी प
२= दुरितनाशकं। आमयनाशकं वा=२
व द्वयमारोह शददले [illegible] पुरुसंपते॥ संपूज्य वैश्यावीर्यकीर्त्तनाब्राह्मयाद्यं ये न्द्रे पं॥१४॥ म
ओंगीकासुरमर्दकोरोपुर्दद्यादिकान्॥ चतुरं ओं चसम्पूज्यं सर्वतोस्तत तोयजेत॥१५॥
खड्गं चर्मधराध्येयाचं [illegible] ः॥१८॥३

५४ये ज्ञ दं मो भि: श्रियं सर्वेष्टसिद्धये ॥ ४५

मं० श्चा ध्वो केशा श्रस्त्र संयुता ! २७ एवं संसाक्षितो मंत्रः प्र [redacted]
२२२ योगाह: प्रजायते । कार्त्तवीर्यार्जुनस्याथ पूजार्थं यंत्रमुच्यते २८ दिक्पत्रे विलिखेत्तत्व बीजं मदनश्चा
त्वा दिवार्क्कणर्कं वर्मीत प्रणवादि बीजं दलकेशपाशी पत्रांतरे । ॐ ष्मा ग्र स्वर केसरं परिहतं शेषैः स्वकोणा
स्त्रमद्रू ताणां क्षितिमंदिरा हतामिदं यंत्रं धराधीशितुस्सुरभूमाव अष्टगंधैर्लिखित्वा यंत्रमादरात् । तत्र कुंभं प्रतिष्ठा
कार्त्तवीर्ये प्यतत्राव्वाह्या र्वयेन्नृपं । स्पृष्ट्वा कुंभं जपेन्मंत्रं सहस्रं विजितेंद्रियः ॥ अभिषिं पुत्रान्यशो रोगनाशमा पुः स्व
जनरंजनं वा किं दिंसुदशकुंभाभिषिक्तो लभते नरः २९ शत्रुपद्रवमापन्नग्रामे वा [redacted] पुटमेदने । संस्था
प येदिदं यंत्रमारभीतिनिवृत्तये ॥ ॥ सर्वपारिप्लस्तनकपीसेमार्यतोर पुः । धत्रे रे ह्यमपते निं बैद्र्घ्यते वष्ण
ते उवुजे ! २४ उचायघने विभीतस्य समिद्भिः खदिरस्य सा । कटु तैलमहिष्याज्यं होमद्रव्यां नसन्म नं २५ कर्वें दु ते:

112

१॥ तीयादिनवांतेतुबीजयोस्याद्व्यतिक्रमः॥ मंत्रैतु दशमे वर्णान्वमंत्रमध्यगाः॥ ८

४ तेषुमंत्रवर्येषुस्यानुकूलंमनुंभजेत्॥ पद्धति ८

१= गुग्गुलुनां होमः=१

श्रियः प्राप्तिस्तिलैराज्यैरघुक्षयः॥ तिलतंदुलसिद्धार्थैर्लाजैर्वश्योत्तपोभवेत् २६ [redacted]

[redacted] प्रमागीर्कदूर्वाणां होमोलक्ष्मीप्रदो ऽद्धुतः॥ श्रीवश्यपद्मतद्वयंगणांपुरांणांभूतशांतिदः॥ त्राश्वत्थो

दुंबरप्लक्षवटबिल्वसमुद्भवाः॥ समिधोलभते हुत्वापुत्रानायुर्धनंसुखं २८ निर्मोकहेमसिद्धार्थलवणैर्श्री यत्नेर२

रनाशनं॥ रोचनागोमयैःस्तंभोभूप्राप्तिःशालिभिर्हुतैः २९ होमसंख्यात्वसर्वत्र सहस्रायुतसंख्यिकाः प्रकल्प ८

नीयामंत्रज्ञैःकार्यगौरवलाघवात् ३० कार्तवीर्यस्यमंत्राणामुच्यंतेसिद्धिदाभिदाः॥ कार्तवीर्यार्जुनंङेहृदंत

स्सर्वत्रयोजयेत् ३१ वेदीजाद्योदशार्णोऽसावेतेनवशिवाक्षराः॥ श्रोंघ्रुबीजहृयेनासौद्वितीयोमंत्रईरि

तः॥ कामाभ्यांतृतीयोऽसौमन्मथाभ्यांतुचतुर्थकः॥ पाशाभ्यांपंचमोऽसौषष्ठःसोऽनचमामया ३३ कु

शाभ्यांसप्तमस्या[redacted]रमाभ्यामष्टमः॥ वाभवाभ्यांनवमोवमश्रीभ्यांतथांतिमः॥ एषामाद्यविरा

३=अथदशमनवः॥ अथ॥ फ्रोंकार्तवीर्यार्जुनायनमः॥१॥ फ्रोंश्रींकार्तवीर्यार्जुनायनमः॥१॥२॥ फ्रोंक्लींकार्तवीर्यार्जु =२

२=नायनमः॥१॥३॥ फ्रोंभ्रूंकार्तवीर्यार्जुनायनमः॥१॥४॥ फ्रोंआंकार्तवीर्यार्जुनायनमः॥१॥५॥ फ्रोंक्रींकार्तवीर्यार्जु =२

नायनमः॥१॥६॥ फ्रोंक्रोंकार्त.॥१॥७ ॥८॥ हुंफट्कार्त.॥१॥१०॥ इतिदशमंत्राः=१

१=फ्रां फ्रीं फ्रूं फ्रैं फ्रौं फ्रः =१ ३= ॐ नमः कार्त्तवीर्यार्जुनाय हुं फट् स्वाहा ।१४=३
४= ॐ नमो भगवते कार्त्तवीर्यार्जुनाय हुं फट् स्वाहा ।१८ =४

मं० छंदोऽन्येषु त्रिष्टुबुदाहृतो दशमंत्राद्दमेषो क्षायदास्तु ऋषावादिकाः ३५ नदादिमः शिवाग्निरस्यादन्येतदुदा
११२ शास्वराः ॥ त्रिष्टुप्छंदः स्तदाद्येस्यादंत्ये पु जगतीमता ३६ एवं विंशतिमंत्राणां यजनं पूर्ववन्मतं द्दीर्घाद्य
113 मूलबीजेनकु [redacted] र्यादेषां षडंगकं ३७ तारो हृत्कार्त्तवीर्यार्जुनाय वर्माऽस्त्रठद्वयांत ईशार्णो मंत्रो
यमसेज्यापूर्ववत्स्मृता ३८ भूनेत्रसप्तनेत्राग्नि वर्णैरस्यांगपंचकं तारो हृद्भगवान्ङे ता कार्त्तवीर्यार्जुनस्त
था ३९ वर्मास्त्रान्निद्वियामंत्रः प्रोक्तो द्वात्रिंशवर्णवान् त्रिवेदसप्तयुग्माक्षिवर्णैः पंचांगकं मनोः ४०
नमो भगवते श्री ति कार्त्तवीर्यार्जुनाय च सर्वदुष्टान्तकाये ति तपोबल पराक्रम ४१ परिपालितसप्तद्वीपा
य सर्वराजन्यचूडामणये महाशक्तिमते ततः । सहस्रदहनप्रोतिवर्मास्त्रांतो महामनुः ॥ त्रिषष्टिवर्ण
वान्प्रोक्तः स्मरणात्सर्वविघ्नहृत् ४२ राजन्यचक्रवर्ती च वीरः शूरस्तृतीयकः । माहिष्मतीपतिः पश्चाच्चतुर्थः रा॰मं०
१= नमो भगवते श्री कार्त्तवीर्यार्जुनाय सर्वदुष्टान्तकाय तपोबलपराक्रमपरिपालितसप्तद्वीपाय सर्वराजन्य ११२
२= चूडामणये महाशक्तिमते सहस्रदहने हुं फट् ६३ =२

१= स्मरणात्सर्वविघ्नहर्त्रे हृदयाय नमः। खड्गान्यवक्रे वार्तिनेत्रे शिरसे स्वाहा। वीरश्रूराय विक्रिस्वायै वषट्। माहिष्म =१
